This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

॥ अथ कंठाभरणप्रारंभः ॥ श्रीसांबप्रसन्न ॥

Acc-No: ~~772~~ M 1142
Title: ~~कंठाभरण~~
Subject: ~~वैदिक~~
~~पत्रे~~ :- 33

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ.ठा० श्री गणेशाय नमः ॥ श्री गुरु समर्थ ॥ ननु ततो ब्राह्मणभोजनमिति भर्ण
भोजनशब्दस्याशीर्वादोपलक्षकत्वात्कर्मस्पनेनरमाशीर्वचनं
ग्राह्यमित्युक्तं ॥ तत्कल्पनायां किंचिन्मानमस्ति ॥ स्वस्तिवाचनेम
त्रेषमित्याश्वलायनकारिकायोस्तु स्वस्तिवाचनेकरणोक्तत्वात्क
र्मणामाद्यंतयोः स्वस्तिवाचनं कर्तव्यं इति अर्थपरत्वादितिचेत्स
त्यं ॥ आशीर्वचनस्यापि पुण्याहवाचनांतःपातित्वेन तस्यास्तद्विधा
यकत्व संभवात् ॥ ब्राह्मणभोजनस्याशीर्वचनावांतरफलकत्वाच्च ॥
किंच शातपथब्राह्मणे एतांऽआशिषआशास्ते यजमानाय सादरेना
रभ्याधीतत्वाद्बहारख्यानसमानाधिकरणत्वेनारभ्याधीतत्वात्स

१

२

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैगुणइत्तिपरिभाषाध्यायेभिहितत्वांप्राणमस्ति॥तथाचबाव्ही
षुप्राचिनपद्धतिषुब्राह्मणभोजन्याशिषोगत्तित्वासानन्नुयं
विसर्ज्यखुह्यतोभुंजीनेतिदर्शन॥शिष्टाचाराच्चब्राह्मणभोज
नस्याशीर्वादोपलक्षकत्वमस्तुं॥तत्रादौस्वशाखीयोक्तंग्राह्यं॥
तदुक्तंस्मृत्यंतरे॥सूत्रोदितंकर्मयथाविधि॥स्यात्तथैवकुर्यात्स्वगु
रूपदिष्टं॥वेदोक्तमाशीर्वचनंविधेयमादौस्वशाखीपरतोन्यशाखी॥
॥१॥सर्वत्रकर्मणामंतेमंत्राशिषमनुत्तमां॥दद्युर्विप्राःस्वशाखो
क्तामादौतत्कर्मशाखीनइति॥एवमधीत्यशाखामात्मीयामन्यशा
खांततःपठेदिति॥स्वशाखालक्षणंतुस्वाध्यायापरपर्यायःस्वप
रंपरापरिगृहीतास्तस्यास्तस्याःस्वशाखोक्तं॥तथाचस्वाध्यायवि

धिना स्वशाखोक्तमेव कर्मतो वेद इति न यस्य यस्य वेदस्य या या शाखा
स्य परंपरागत हि प्रसज्जते ॥ स्वाध्यायाध्ययनदृष्टार्थत्वेन कर्मानुष्ठाना
र्थत्वात् ॥ तदुक्तं वसिष्ठस्मृतौ ॥ पारंपर्यागतो येषां वेदः सपरिबृंहणः
तच्छाखं कर्म कुर्वीत तच्छाखाध्ययनं तथा ॥ यः स्वशाखां परित्यज्य
मोहाद्धो कर्म वैदिकं ॥ आचर परशाखोक्तं शाखारंडः स उच्यते ॥ मनु
स्मृतौ ॥ स्वशाखां तु समुत्सृज्य परशाखां समाचरन् ॥ अप्रमाणमृषिं कृ
त्वा सोंधे तमसि मज्जतीति ॥ मधुपर्कं तु सर्वाध्वर्यु शाखाकार्य इति
वचनादध्वर्युशाखादरः आश्वलायनादीनां गृह्यानुष्ठानादौ माध्यं
दिनादीनां स्वस्तिवाचनाय मंत्राम्नानं स्वशाखायामित्यादि वचना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवकाश इतिध्येयं ॥ अत्रेदं विचार्यते ॥ क एवमाध्यंदिनादिवाजसने
यिभिः पठ्यमानेमुख्योयजुर्वेद उत शाखेवति ॥ तत्रो नयथावचनं
दर्शनात्संदेहः ॥ तथाह ॥ तैत्तिरीयब्राह्मणो ॥ भरद्वाजो ह त्रिभिरायु
र्भिर्ब्रह्मचर्यमुवास ॥ तꣳ ह जीर्णꣳ शयानं ॥ इंद्र उपव्रज्योवाच ॥ भ
रद्वाज यत्ते चतुर्थमायुर्दद्यां ॥ किमेनेन कुर्या इति ॥ ब्रह्मचर्यमेवैन
त नचरेयमिति होवाच ॥ तꣳ ह त्रीन् गिरिरूपानविज्ञातानिव दर्शयां
चकार ॥ तेषाꣳ हैकैकस्मान्मुष्टिनाददे ॥ सहोवाच भरद्वाजेत्यामं
त्र्य ॥ वेदा वा एते ॥ अनंता वै वेदाः ॥ एतद्वा एतैस्त्रिभिरायुर्भिरन्व
वोचथाः ॥ अथत इतरदननूक्तमेव ॥ एहि मं विद्धि ॥ अयं हि सर्वविद्या

कं.ठा.

ख्येति ॥ सर्वासांशाखानांवेदशब्दाभिधानात् ॥ स्कंदे तु अवतीर्णो म
हायोगी सत्यवत्यांपराशरात् ॥ उत्सन्नान्भगवान्वेदानुज्जहार हरिः
स्वयं ॥ चतुर्धा विभज्य तांश्च च तुविंशतिधा पुनः ॥ शतधा चैकधा
चैव तथैव च सहस्रधा ॥ अथर्वाणां द्वादशधा मित्वा शाखा आची
क्लृपदिति सामान्येन शाखाशब्दश्रवणात् ॥ अथ पूर्वपक्षः ॥ द्वापारा
दौ वेदव्यासेन स्वशिष्येभ्यश्च तुर्भ्य उपदिष्टास्त एव मुख्या वेदाः ॥ तै
र्व्यासशिष्यैर्विभज्य स्वशिष्येभ्यो दत्ताः शाखा इति ॥ तथा च वेदव्या
सेन एतत्तं वादिवेदानामेपदेशात्त एव मुख्याः ॥ का एवादृशास्तु त
दनंतरं भवित्वादः मुख्या इति ॥ तदुक्तं द्वादशस्कंधे ॥ अस्मिंन्नभ्यं

भर्ण.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरंब्रह्मन्नु भगवान्लोकभावनः॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये॥ पराशरात्सत्यवत्यांमशांशकलयाविभुः॥ अवतिर्णो महाभाग वेदंचक्रेचतुर्विधं॥ ऋक्थर्वयजुसाम्नाराशीनुद्धृत्य सर्वशः॥ चतस्त्रासंहिताश्चक्रे सूत्रेमणिगणाइव॥ तासांसचतुरः शिष्यानुपहूय महामतिः॥ एकैकांसंहितांब्रह्मन्नेकैकस्मै ददौविभुः पैलायसंहिताम्आद्यांबव्हृचाख्यामुवाचह॥ वैशंपायन संज्ञायनिगदाख्यंयजुर्गणं॥ साम्नांजैमिनयेप्राह तच्छंदोगसंहितां॥ अथर्वांगिरसंप्राहस्वशिष्यायसुमन्तवे॥ तेश्चशिषप्रशिष्यायदाशाखाप्रवर्तिता॥ यजुर्वेदेतैत्तिरियशाखोस्यांत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्तावमाह॥ वैशंपायनशिष्यावैच्चरकाध्वरकाध्वर्यवोभव
न्॥ येचेरुर्ब्रह्महत्यांहः क्षपणंस्वगुरोर्व्रते॥ याज्ञवल्क्यस्तुतच्छिष्यः
आहाहो भगवन्कियत्॥ चरितेनाल्पसाराणांचरिष्येहंसुदुश्च
रं॥ इत्युक्तोगुरुरप्याहकुपितोयाह्यलंत्वया॥ विप्रावमंत्राशिष्येण
मदधीतंत्यजाश्विति॥ देवरातःसुतःसोपिछर्दित्वायजुषांगणं
ततोगतोथमुनयोददृशुस्तान्यजुर्गणान्॥ यजूंषितित्तिराभूत्वा
तल्लोलुपतयादधुः॥ तैत्तिरीयाइतियजुःशाखाआसान्सुपेश
लाः॥ काण्वमाध्यंदिनादिशाखांप्रसंगमाह॥ याज्ञवल्क्यस्ततो
ब्रह्मन्छंदांस्यधिगवेषयन्॥ गुरोरविद्यमानानिसूपतस्थेर्कमी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वरं॥ गुरोर्वैशंपायनस्य॥ व्यासेन विभज्यानुक्तत्वादविद्यमाना
नि॥ अधिकानि गवेषयन्नगमयन्॥ सूपनस्थ्ह सस्यकृष्ठाव॥ ई
श्वरं मत्वा वेदान्॥ तथा च श्रुतिः॥ ऋग्भिः पूर्वाह्णे दिवि देव ईयते य
जुर्वेदे तिष्ठति मध्ये अह्नः॥ सामवेदेनास्तमये महीयते वेदैरशून्य
स्त्रिभिरेति सूर्य इति॥ याज्ञवल्क्य उवाच॥ ओं नमो भगवते द्रस्यादि
नास्तोत्रेण॥ एवं स्तुतस्तु भगवान् वाजिरूपधरो रविः॥ यजुंष्य
यातयामानि मुनये दात्त्वसादितः॥ यजुर्भिः कारोच्छाखा दश पंचश
तैर्विभुः॥ जगृहुर्वाजसंन्यस्ताः काण्वमाध्यंदिनादयः॥ पंचदश
शाखाः॥ शाखैरपरामितैः॥ यजुर्भिरकरोत्॥ शाखैरिति पाठे स एव
याज्ञवल्क्यस्तैर्यजुर्भिरकरोदिति॥ जगृहुरधीतवन्तः॥ रवेणाअ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के० स्वरूपेणवाजेभ्यः केसरभ्यसंन्यास्तास्यन्तः ॥ वाजसंन्यस्ताः ॥ शा मं०
खावाजसनीसंज्ञाः ॥ ताः शाखारतिभिन्नेपदंवा ॥ इतिप्रासेभिधीय
ते ॥ मंत्रब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यते ॥ यजुर्वेदः सविज्ञेयोअन्ये
शाखांतराख्यानमिति ॥ परिशिष्टोक्त्या शुक्लयजुषामयान्तयाम
त्वेनचरकचरकाएवाद्यामुख्याइतराखसुख्यास्तत्रापिमाध्यंदीनी
शाखायामुख्यंत्वेमुख्याध्यस्यायजुर्वेदपदवाच्यमिति ॥ नन्विदंपरिशि
ष्टवचनमितरवोपिसमानमितिचेन्न ॥ वचनार्थासंभवात् ॥ तथाहि ॥
मंत्रब्राह्मणस्यकेविशेषमाह ॥ त्रिगुणंयत्रपठ्यतेसयजुर्वेदइति ॥
तत्रत्रिगुणमितिक्रियाविशेषणंअथवामंत्रब्राह्मणयोरितिसमस्त
स्यपदस्यबुध्याविविक्तस्यब्राह्मणपदस्यनपुंसकलिंगस्यविशेषणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाअन्स्यद॥ तत्र प्रथमे पक्षे मंत्रब्राह्मणात्मको यो वेदस्य यत्र यस्यां
शाखायां त्रिगुणपथास्यां तथा पठ्यते स मुख्यो यजुर्वेद इत्यर्थः संभवति
तत्र त्रैगुण्यं किं विध्यर्थवादमंत्ररूपेण हास्विन्नु संहितापदक्रमरू
पेण वा॥ नाद्यः॥ शाखापाठस्य विध्यर्थवादमंत्ररूपत्वेनातिव्याप्तेः
द्वितीयस्तु॥ काण्वमाध्यंदिनानामेव संभवति॥ तेषां मंत्रब्राह्मणात्म
कवेदस्य संहितादित्रिगुणपाठस्य विद्यमानत्वात्॥ नन्विदं शतपथेब्रा
ह्मणस्य पदक्रमपाठाभीकारोऽयं त्रैगुण्यमिति चेत्सत्यं न वयं शतप
थब्राह्मणस्य त्रैगुण्यमिति ब्रूमः॥ किंतु मंत्रांतःपतिब्राह्मणभाग
स्य ब्राह्मणेन ब्राह्मणमित्यादिकेस्य त्रैगुण्यमिति॥ तच्च काण्वमाध्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कै॰ दिनानामेव संभवति ॥ तन्त्वापस्तंबादीनामपि ब्राह्मणस्य तथा तथा मं॰
त्वात्संभवति त्वादशपाठऽत्स्थेन्न ॥ तेषां संहितां तैः पातिव्याख्यान
रूपांशस्य ब्राह्मणत्वेमानाभावात् ॥ ननु प्रथमाष्टके संपश्यामि प्रजा
अहमिति मन्त्रे सोमानविरिरूपत्वेस्य संपश्यामि प्रजा अहमित्साह
यावन्त एव ग्राम्याः पशवस्ता नेवावहं चेयस्या भोवा भक्षीयेसह ॥ भा
स्यता महस्य महोवा भक्षीय स्वाह महोस्य ता सहस्य सहोवा भक्षीय
स्वाह सहस्वता उर्जस्थोर्जेवा भक्षीय स्वाघेदः काएवमाध्यंदिनादि
संहितायामपि वसंताय कपिंजलीनालभते ग्रीष्माय कलविंकानित्या
देस्तथा ब्राह्मणे ब्राह्मणश्च त्राय राजन्यमित्यादि अप्यव्याख्यानरूपांश
स्य ब्राह्मणत्वे सर्वानुक्रमणिकासूत्रे अन्यस्य परो ब्राह्मणो ध्यायस्त

12

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याब्राह्मणब्राह्मणमितिब्राह्मणोध्याय इतिकात्यायनोक्तिः प्रमाणं॥ अ
पस्तंबादीनामनुक्रमणिकायांअभावाद्वाचनोत्तरांभावाच्चव्याख्याने
रूपांशस्यब्राह्मणव्यवहारः॥ अन्यथाब्राह्मणांतर्गतमंत्रभागस्यापिसं
हितात्वापत्तेः॥ किंचव्याख्यानमात्रेणब्राह्मणत्वे॥ कुशीदज्योतिषच्छंदो
तथाकुस्थिदकादीनांदृश्यब्राह्मणस्यात्॥ तस्माद्याचद्वचचनेवाच
निकंपितिन्यायेनवाजसनेयीनांकाण्वादीनामवेदलक्षणनाम्येषामि
तिसिद्धं॥ नद्वितीयः॥ त्रिगुणशब्दस्यवदशब्देनान्वयेसंभवतिसम
स्तब्राह्मणपदंविच्छिद्यतेनान्वयकथनेव्यवहितान्वयदोषानकल्पना
गौरवाच्च॥ भवतुवाव्यवहितान्वयः॥ तत्रब्राह्मणस्यत्रिगुणत्वंकिंना
म॥ संहितोपेक्षयाग्रंथांत्ततोवा॥ किंवाआदौमंत्रप्रतीकंगृहीत्वातस्यव्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ख्यानं कृत्वा पश्चान्मंत्रप्रतीकस्योपसंहार इति ॥ यथा आ ब्रह्मन्ब्राह्मणो ब्र
ह्मवर्चसी जायतामित्याह ब्राह्मण एव ब्रह्मवर्चसं दधातीति तस्मात्पुरा ब्राह्म
णो ब्रह्मवर्चसी जायतेत्यादौ तथात्वदर्शनादिति अत्राद्यपक्षे मुख्यत्व
काण्वादीनामेव संपद्यति न त्वापस्तंबादीनां ॥ शतपथब्राह्मणस्य संहि
तापक्षे यायग्रंथस्य त्रिगुणत्वोपलब्धेः ॥ आपस्तंबादीनां संहितायां ब्रा
ह्मणस्य च ग्रंथांतःसाम्यात् ॥ द्वितीयेपि किं मंत्रमात्रव्याख्यानत्वेन
त्रिगुणपाठः ॥ किं वा मंत्रैकदेशव्याख्यानत्वेन ॥ अत्रापि प्रथमपक्षः
काण्वादीनामेव संभवति ॥ तेषां शतपथब्राह्मणे मंत्रमात्रस्य व्याख्या
नात् ॥ आपस्तंबादिब्राह्मणस्य मंत्रसमानत्वेन मंत्रमात्रव्याख्याना
भावात् ॥ नान्त्यः ॥ शाखांतरस्थपि ब्राह्मणस्य मंत्रैकदेशव्याख्यानत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नात्तिख्यास्ये:॥ मंत्रैकदेशव्याख्याने तु मैत्रायणादिशाखासु प्रसिद्धं॥
अन्यद्वेति न तियोपि न तस्य विकल्पासहत्वादनिर्वचनीयत्वाच्च॥ किंच शु
क्लानीमेनियजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायंत इति बृहदार
ण्यकश्रुतेः॥ मानिकाएवादीनि शुक्लानि शुद्धानि यजूंषि वाजसनेरप
स्येन याज्ञवल्क्येन ऋषिणा आख्यायंते स्वशिष्येभ्य उपदिश्यंत इति
विद्यारण्यश्रीपादैर्व्याख्यानत्वेन शुक्लकृष्णमिति द्वैधा यजुश्च
समुदाहृतं शुक्लं वाजसनेयं तत्कृष्णं तु तैत्तिरीयकं॥ अध्वर्यवश्चावि
द्वांश्च बुद्धिमालिन्यहेतुत्वान्न यजुः कृष्णमीर्यते॥ एवंविधिनप्रक
रणेन यजुः शुक्लमीर्यत इति स्मर्तव्या च शुक्लयजुष्ट्वविधानेनापि मुख्या
त्वात्॥ अपिच॥ अयथायातयामानि तु भानुगुप्तान्यतः न्यानिजातान्यपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ०

नीरसानि॥यजूंषितेषामथयाज्ञवल्क्योऽलभततयामानिखेखाये ५०

तिभाविष्यद्वचनेनकाण्वादीशाखानांवीर्यवत्त्वाभिधानात्मु

ख्यत्वमितिप्रसिद्धं॥यदुक्तंवेदव्यासेनद्वापरादौअनुक्तंपरि

ष्कृत्वात्काण्वादीनाममुख्यत्वमिति॥तदपिनासर्वज्ञेनवेदव्या

सेनचविरक्तांतंज्ञात्वासारभूतंयजुर्गणंसुर्यायायदिश्यपनि

धिधिज्वेनस्थापितवान्॥तदुक्तंवाराहपुराणे॥हयग्रीवःकृ

दाचित्तुसुदृढऋषीमहाबलः॥सुराणामुपकारायवेदानाहृत्य

योर्यतः॥क्षिपित्वाबहून्वेदान्सपातालंसमाविशत्॥देस

विदार्यतान्वेदान्ब्रह्मणेसददौहरिः॥द्वापरादौततोयोगी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाराशर्यो महातपाः ॥ अवतीर्य पतान्वेदान्स्वशिष्येभ्य उवाच ह ॥
अचिवृत्तां तमाज्ञाप्य त्रिकालज्ञो महामुनिः ॥ यजूंष्यपातमानि सूर्य
मव्याप्य चिक्षिपे ॥ यद्दृष्ट्वा याज्ञवल्क्योथो दृ दास्येथ वेगेषयनृ ॥
गुरोरध्यमानानि स्तूपस्थे विभावसुः ॥ स्तुयं प्रसाद्य कालेन प्रापतस्मा
द्यजुर्णानु ॥ शुक्लान्ययातयामानि यजूंषि प्रथ्य भास्वतः शाखाश्चक्रे
पंचदश काण्वाद्याश्च मलावमुनिरिति ॥ एवमतो हितारनाख्यानेप्य
निधित्वेन स्थापितं सारभूतं यजुर्गणं याज्ञवल्क्यायोपदिशेति व्या
ख्येयं ॥ तद्यथा ॥ भारते याज्ञवल्क्य उ० ॥ अव्यक्तं परमं स्थितं नृप
श्रोहं वैशंपायन ॥ परमं गुह्यमिमं प्रश्नं शृणुष्व वहितो नृप ॥ यथार्ष
र्षेह निधिनोचरता त्रक्रमेण हि ॥ मयादित्यादवाप्तानि यजूंषि मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वं० श्रुत्वाधिप॥ महता तपसा चैव सविता सेवितो मया॥ प्रीतेन चाहं विभू- भं०
नासूर्येणोक्तस्तदानघ॥ वरं वृणीष्व भद्रं ते यदिष्टं ते सुदुर्लभं॥ ततो दा-
स्याम्यि प्रीतात्मा मत्प्रसादाति दुर्लभं॥ ततः प्रणम्य शिरसा मया प्रोक्त-
स्तपतां वरः॥ यजूंषि नोपयुक्तानि क्षिप्रमिच्छामि वेदितुं॥ नोपयुक्ता-
नि मद्गुरुणा ज्ञातानीसर्थः॥ ततो मां भगवानाह वितरिष्यामि ते द्विज
सरस्वती हि वाग्भूता शरीरं ते प्रवेक्ष्यति॥ पुनर्मामाह भगवानास्यं
स्वं विवृतं कुरु॥ ततो मया स्यं निवृत्तं प्रविष्टा च सरस्वती॥ ततो वि-
दह्यमानोहं प्रविष्टोम्भस्तदानघ॥ अविसानाच्चपर्मोश्च भास्क-
रस्य महात्मनः॥ ततो विदह्यमानं मामुवाच भगवान्रविः॥ मुहू-
र्त्तं सह्यतां दाहस्ततः शांतिर्भविष्यति॥ शीतीभूतं च मां दृष्ट्वा भ-

१०

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गवानाह भास्करः ॥ प्रतिष्ठास्यति ते वेदः सोत्तरः सखिलो द्विजः ॥ कृत्स्नं
शत पथं चैव त्वं प्रणेष्यसि वै द्विज ॥ तस्मीनेचापुनर्भावे बुद्धिस्तव भविष्य
ति मत्प्रादस्य सेव्यपदिष्टं न सांख्ययोगे प्सितं पदं ॥ एतावदुक्तो भगवानस्त
मेवाभ्यपद्यत ॥ ततो हं व्याहृतं श्रुत्वा गते देवे विभावसौ ॥ गृहमागत्य सं
हृष्टो चिंतयं वै सरस्वती ॥ ततः प्रवृत्ता निशुभा स्वर व्यंजन भूषिता ॥ ॐ का
रमादितः कृत्वा मम देवी सरस्वती ॥ ततोहमर्घ्यं विधिवत्सरस्वत्यै न्यवेदयं ॥
तपतां च वरिष्ठाय निषण्णस्तत्परायणः ॥ ततः पथं कृत्स्नं सरहस्यं स
संग्रहं ॥ चक्रेण परिशेषं च हर्षेण परमेण ह ॥ कृत्वा चाध्यापयामास शि
ष्याणां शतमुत्तमं ॥ विप्रियार्थं स शिष्यस्य मातुलस्य महात्मनः ॥ त
तः सशिष्येण मया सूर्येणेव गभस्तिभिः ॥ व्यापितो यज्ञो महाराजप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं॰ नुस्तव महात्मनः ॥ निषन्नो देवल स्यापि तदूर्ध्वेद्द तवाहनं ॥ स्ववेदाद्दक्षि न॰
णार्थं विमर्दमातुलेनह ॥ सुमंतु नामथ पैलेनं तथा जैमिनिनाच वै ॥ पि
त्रां नेपुनिभिश्चैवनतोहमनुमानितः ॥ दशपंचवलव्धानियजूंष्य
कृतिमयानघ ॥ तथैवलोमहर्षाख्य पुराणमवतारितं ॥ विजमेन सु
रकुस्य देविं च सरस्व सरस्वती ॥ सूर्यस्य चानुभावेन प्रवृत्तोहं नधिपं ॥
कृतें शतपथं वेदमपूर्वकारितं च मे ॥ यथाभिलिखितं मार्गे तथा चैवोपपया
कतें शतं ॥ शिष्याणामाखिलं कृत्स्नमनुज्ञातं ससंग्रहं ॥ सर्वे च शिष्याः श्रु
दितं ॥ शिष्याणामाखिलं कृत्स्नमनुज्ञातं ससंग्रहं ॥
च योगताः परमहर्षिताः ॥ शाखापंचदशैतास्तु विद्या भास्करदर्शितः
प्रतिष्ठाप्य यथाकामं वेद्यं तदनुचिंतयं ॥ किमत्र ब्रह्मसत्कृतं किं च वेद
मनुत्तमो भित्ति सर्वं निरचयं ॥ तदुक्तं विष्णुपुराणे तृतीयांसे ॥ ~

१०

(19)

पाराशर उवाच॥ यजुर्वेदतरोशाखाआसन्नेकोत्तरंशतं॥ एकोनषष्टिशा
खाश्चकंठादय उदाहृता:॥ सप्तविंशतिशाखाश्च ततः कृष्णक्रिया: स्मृता:
वैशंपायननामासौ व्याससशिष्यश्चकारस:॥ शिष्येभ्य: प्रददौ नाश्च ततः
गृहस्तेष्वनुक्रमात्॥ भाविज्ञात्वा महात्मा य व्यास: सत्यवतीसुत:॥ दशापं
चाथया: शाखा: सूर्योयोपदिशाह॥ वैशंपायनशिष्यस्तु याज्ञवल्क्य: प्रकृ
ष्टधी:॥ ब्रह्मरातिसुतो ब्रह्मन्गुरुवृत्तिरतोभवत्॥ ऋषिणायो महमेरो
समाजेनागमिष्यति॥ तस्यवैसप्तरात्रेतु ब्रह्महत्या भविष्यति॥ पूर्वमेवम्
मुनिगणै: समयोभूत्स्तुताद्विज॥ वैशंपायन एकस्तु तं व्यतिक्रांतवांस्तदा
स्वास्त्रीयं बालकं सोथपदार्थमताडयत्॥ शिष्यानाह च भो शिष्या ब्रह्म
हत्यापहं व्रतं॥ चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा॥ अथाह याज्ञ
वल्क्यस्तु किमेभिर्बहुभिर्द्विजै: क्लेशितैरल्पतेजोभिश्चरिष्येहमिदं व्रतं॥

20

ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिं ॥ मुंच्यतां पठ्यया धीतं मतो वि
प्रावमात्रो न वत् ॥ निस्तेजसो वदस्येतान् पठब्राह्मणपुंगवान् ॥ तेन शिष्ये
ण नार्थोस्ति मम आज्ञाभंगकारिणां ॥ याज्ञवल्क्यस्ततः प्राह भक्त्यैतन्मम
यादितं ॥ ममाप्यालं त्वयाधीतं जन्मयातमिदं द्विज ॥ पाराशर उ० ॥ इत्युक्तो
रूपिराक्तानि सरूपाणि यजूंषि विधिवत् ॥ छर्दयित्वा ददौ तस्मै प्रययौ स्वेच्छ
या मुनिः ॥ यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विजाः ॥ जगृहुस्तित्तिरि
भूत्वा तैत्तिरीयास्तु ते ततः ॥ ब्रह्महत्यावतं चीर्णं गुरुणां दशितैस्तु पैः ॥ च
रकाध्वर्यवस्ते तु चरणां मुनिसत्तम ॥ याज्ञवल्क्योथ मैत्रेय प्राणाया
मपरायणः ॥ तुष्टाव प्रयतः सूर्यं यजूंष्यभिलषंस्ततः ॥ याज्ञवल्क्य उ०
नमः सवित्रे द्वाराय विमुक्तेरमिततेजसे ॥ ऋग्यजुःसामभूताय त्रयीधाम्ने
च ते नमः ॥ नमोग्निसूर्यभूताय जगतःकारणात्मने ॥ भास्कराय परं तेजः

धी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोपुंण्यंमुन्दविचित्रतदसाद्यारम्भकाभिः पंचदशशाखानामनंतरंभवितुमितिन
कृष्वदपिक्षुद्रोपद्रवइतिसंक्षेपः ॥ अथपंचदशशाखामुख्यतिवेतिव्याख्या
तदुक्तंबृहन्नारदीये ॥ यजुर्वेदमहाकल्पचरोरेकोनरंशत ॥ शाखास्तत्रशिखा
२। काद्दशपंचाप्यशुक्लगाः ॥ तत्रापिमुख्यविज्ञेयंशाखामाध्यंदीनीयजूकरिति ॥
लोकेसिद्धिकृरितिप्रमाशीर्वचनेमाध्यंदिनाज्ञामनेतिपश्चाल्लाखेवाइति ॥
तत्रकेचिदेवमाचक्षते ॥ चरणव्यूहविष्णुपुराणादिषुशाखाविभागकथनेक
णवशाखाया ॥ प्रथमोद्देशात्तेनैवक्रमेणमंत्रक्रमोध्यवसेयइति ॥ तत्रैत
दुच्यते ॥ ननावच्छाखापाठक्रमेणमंत्रक्रमः संप्रतिपन्नोस्ति ॥ तत्रैवक्रमज्ञा
श्रीते ॥ तत्रक्रमभंगेप्रत्यवायोनैष्फल्यंवाभवति ॥ यथावैश्वदेवमत्वाभो
जनप्रत्यवायोयथावादर्शपौर्णमासाभ्यामनिष्ठाविकृतिनामनुष्ठानेनैष्फल्यं
नचात्रपूर्वपूर्वमंत्रपाठमंतरोत्तरशाखीयमंत्रपठनक्रमस्थित्यत्यवेति ॥ नवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ० नैष्फल्यं भवति॥ किंचैवं क्रमविवक्षया॥ होमादिकर्मसु चतुर्वेदिनां योगपद्ये भ०
नमंत्रपाठो न स्यात्॥ क्रमभंगापत्ते॥ अपि चैवं शाखीयानां तत्तच्छाखापारा
यणादाने युगपत्पारायणं न स्यात्॥ एवं च ऋग्वेदपारायणं समाप्यैव यजुः
पारायणं तत्समाप्यैव सामपारायणं स्यात्॥ ननु सकलशिष्टाचारविरुद्ध
किंचैकेन पुरुषेण युगपत् सकलशाखापठनस्य कर्तुमशक्यत्वादनन्य
गत्यात् तत्र कांक्षा भवीष्यति॥ पुरुषभेदेन च तत्तच्छाखीयमंत्रपाठक्रमेए
वना कांक्षितः॥ किंच यामकानुसारेण॥ अपि च नियमान्यत्रे निजैमिनि
सूत्रे शाखाभेदनाम्नां तानामंत्राणां क्रमनियमो नास्तीति स्पष्टमावेदितं॥
ननु च माध्यंदिनीयमंत्रस्यैव प्राथम्ये किं नियामकमिति चेत्॥ ऋग्वेदमंत्र
स्य प्राथम्ये एव नियामकं तदेवावधारय॥ नहि तत्र ऋग्वेदोथ यजुर्वेदः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सामवेदोऽथर्ववेणइतिपाठक्रमोनियामकः॥ तथासतियौगपद्येनपाठनप्र
त्यवायोनैष्फल्यंचाप्रसज्येत॥ युगपत्पारायणंचानुपपन्नंयास्यात्॥ स्तो
मश्चयजुश्चेतिमहीधराचार्येणाप्यादिविरोपि॥ ननुशिष्टाचारोपिप्रमा
णस्यात्॥ स्यादेव॥ यदाहुः पाराशरस्मृतिव्याख्यातारोमाधवाचार्याः॥ अथ
श्रुतिस्मृत्योरविषयसदाचारोपिअलौकिकाविगीतः प्रमाणं॥ तथाचपाराश
रः॥ धर्मंजिज्ञासमानानांप्रमाणंपरमंश्रुतिः॥ द्वितीयंधर्मशास्त्रंतुतृतीयं
धर्मसंग्रहइति॥ मनुरपि॥ वेदोखिलोधर्ममूलंस्मृतिशीलेचतद्वि
दां॥ आचारश्चैवसाधूनामात्मनस्तुष्टिरेवच॥ इतिशिष्टाचारप्रामाण्यादु
मंत्रस्यप्राथम्यमितिचेत्त॥ माध्यंदिनीयमंपाठतुल्यं॥ इयमापत्तिस्तवैव
वदायिनी॥ किंचैवंमंत्रास्तावकर्मार्थाः॥ पदार्थवेदनादेशादिस्मारकत्वेन
कर्मांगभूताः॥ सर्वैकवाक्यतापन्नपद्यानन्तेषुचाग्निहोत्रादिकर्मसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाठक्रमो न नियामकः॥ किं त्वर्थक्रम एवेति॥ प्रपंचितं चैतत्क्रमो विध्यपर्यकर्म
ण्यसंभवादिति सूत्रे देवयाज्ञिकपित्रभृत्यादिभाष्यकृद्भिः॥ तथा च प्रधानभू
तकर्मस्वेव पाठक्रमो नाद्रियते॥ किमुतेदंगभूतमंत्रपाठस्यादर इति चिंतनि
यं॥ एवं च सति मंत्रब्राह्मणयोर्वेद इति॥ शौनकोक्तवाक्येनापि माध्यंदिन
शाखायाः॥ प्राधान्यमित्यध्यवसीयते॥ तथा हि वेदशब्देनात्र प्रणवः॥
वेदोपब्राह्मणानि दुर्वेदेनैव यद्धीतव्यमिति शपथश्रवणात्॥ स प्रणवः प
त्रत्रीमात्रं प्लुतमिति यावत्॥ पथा स्यात्तथा यत्र पठ्यते [illegible]यजुर्वेद इत्यर्थः॥
प्लुतप्रणवे पाठस्तु माध्यंदिनीयशाखायामेव॥ तथा चोक्तं कौशिकशिक्षा
यां॥ माध्यंदिनीयशाखायां ज्ञेयं प्लुतं चतुष्टयं॥ प्रणवो जंघनो नाम रोहि
णी स्कंदकी तथा॥ एते प्लुताश्च चत्वारो यजुर्वेदे बुधैः स्मृताः इति॥ अ
त एव लोके माध्यंदिनी एव च यजुर्वेद इत्यवहारः॥ अन्यत्र तु काण्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रायणीयाकठाद्यास्तिदिक्॥स्मर्यंते॥माध्यंदिनीतुयाशाखासर्वसा
धारणीस्मृता॥तामेवाश्रुपुरस्कृत्यसेवशिष्टोनप्रकाशितमिति॥वशिष्टपद्ध
तौ॥माध्यंदिनीशाखायाः सर्वशाखोपयोगित्वंस्पष्टमभिहितं॥भूपालपद्ध
तावपि॥माध्यंदिनीयाशाखासर्वसाधारणीस्मृता॥शाखासूक्तासुसर्वा
सुत्रैस्त्रिंशः माध्यंदिनीः स्मृतइति॥अध्वर्युःकर्मसुवेदयोगादितिकल्पद्ध
द्युक्तेः॥कात्यायनाचार्यकृतेसर्वानुक्रमणीसूत्रेतुसर्वाभ्योस्याः श्रैष्ठ्यं
स्पष्टं परमुक्तं॥तथाचदेहोलीरभाष्ये॥यजुर्वेदस्यमूलंहिमेदोमाध्यंदी
नीयेकं॥सर्वानुक्रमणीतस्याः कात्यायनकृतानुया॥व्याख्यानस्यास्त
होलीरः कुर्वन्नत्वागणाधिपं॥विलोक्यसर्वसूत्राणीभाष्यणीचीविध्या
नि च॥इहभगवान्कात्यायनाचार्यःसर्वानुक्रमप्रारंभेप्रथममंगला

26

कें० चरणा॥ पूर्वकं यजुर्वेदस्य मुख्यत्वकथनपूर्वकं ऋषिछंदोदेवतज्ञानार्थं प्रतिज्ञासूत्रमाह॥ मंडलेदक्षिणमाक्षिहृदयं चाधिष्ठितं येन शुक्लानि यजूंषि भगवान्याज्ञवल्क्येयतः प्राप तं विवस्वतं त्रयीमयमध्विष्मं तेमभिध्याय मांध्यंदिनवाजसनेयके यजुर्वेदाम्नाये सर्वे सखिले सशुक्रिये ऋषिदैवतछंदांस्यनुक्रमिष्याम इति॥ तत्रेष्ट मन्वयः॥ वयकात्यायनार्याः॥ यजुर्वेदाम्नाये ऋषिदेवतछंदांसि अनुक्रमिष्यामः मंत्रदृष्टारो ऋषयः॥ देवतानि मंत्रांतर्गतानि॥ छंदांसि गायत्र्यादीनि॥ एतानि वक्ष्यामः॥ नन्वत्राचार्येण यजुर्वेदाम्नाय इत्यभिधानानुआम्नायशब्देन वेदः॥ यजुर्वेदस्याभ्यासो आम्नायश्चेत्येवं समासो न घटते॥ यस्माद्यजुर्वेदपदेनैवासिराम्नायपदमवाच्यमितिचेदाचार्यवचन मं०

१६

(27)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यव्यर्थतास्यादितिचेन्न ॥ आचार्येणाम्नायशब्दोमुख्यत्वेदृष्टः ॥ आ
म्नायःश्रुतिमुख्ययोरित्यभिधानात् ॥ तस्मादाम्नायपदंग्रहीतं ॥ तत्रे
त्थंसमासः ॥ यजुर्वेदस्यआम्नायः ॥ यजुर्वेदाम्नायस्तस्मिन्यजुर्वेदा
म्नायेऋष्यादिकंवक्ष्याम्यइत्यर्थः ॥ ननुयजुर्वेदस्यत्र्यशीतिर्भेदास्त
त्कत्वादाम्नायोमुख्योनज्ञायतइति ॥ तस्मिन्यजुर्वेदाम्नायइत्यतस्तंवि
शेषयति ॥ वाजसनेयकेइति ॥ वाजसनेयिनांपंचदशभेदास्तत्कत्वान्न
ज्ञायतइत्यस्तेतंविशेषयति ॥ माध्यंदिनीयकेइति ॥ वाजसनेयावांत
भेदेमाध्यंदिनीयेसंज्ञेयजुर्वेदाम्नायइत्यर्थः ॥ आम्नायोमुख्यः ॥ प्र
त्याम्नायतस्यद्वितीयप्रकारः ॥ निधिमुख्यः ॥ प्रतिनिधितस्याद्वितीयः
प्रकारः ॥ द्वितीयइत्यादावपिमुख्योमुख्यत्वेज्ञेयं ॥ यजुर्वेदलक्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं० शौनकेनोक्तं ॥ मंत्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते ॥ यजुर्वेदः स विज्ञेय ५०
अन्ये छाखांतरस्मृतं ॥ एतद्वचनलक्षणं विना ज्ञातुमशक्यमतोस्माभिर्व्या
ख्यायते मंत्रस्य ब्राह्मणस्य च वेदसंज्ञा इत्यर्थः ॥ तथा चोक्तं पारस्करेण ॥
विधिर्विधेयस्तर्कश्च वेद इति ॥ विधिर्विधायकं वाक्यं ॥ विधेयो मंत्रः ॥ त
र्कोर्थवाद इति ॥ प्रणवामपि वेदसंज्ञा ॥ एतत्रयं शतपथब्राह्मण एव पठितं ॥ सो
सावाज्यमधिश्रयतीति विधिः ॥ इषे त्वेति विधेयो मंत्रः ॥ वच्यैत दाह इषे त्वेत्य
र्थवादस्तर्क इत्यादि ज्ञेयं ॥ तथा च याज्ञवल्क्यशिक्षायां ॥ अथ शिक्षां प्रवक्ष्यामि या
ज्ञवल्क्यपरिस्फुटं ॥ यजुर्वेदस्य मंत्राणां सम्यक् पाठस्य सिद्धये ॥ प्रणवं प्राक्
प्रयुंजीत व्याहृतीस्तदनंतरं ॥ सावित्री चानुपूर्वेण ततो वेदसमारंभे ॥ इति संहि
तामंत्रस्य ब्राह्मणस्य वेदत्वमुक्तं ॥ त्रिगुणायं त्र पठ्यंते यत्र मंत्रब्राह्मणात्मके
वेदे मंत्रब्राह्मण एव पात्ते यत्र ऋषिच्छंदोदैवतान्विनियोगात्मकं त्रिगुणं य

१५

२१

लो

स्याशाखायांपठ्यतेसयजुर्वेदोमुख्यः ॥ अन्यशाखांतराणि ॥ त्रिगुणलक्षणं
गुप्तमायामथोक्तं ॥ माध्यंदिनेयजुर्वेदे खंब्रह्मांतमुदाहृतं ॥ नारपूर्वं हि त्रिगु
णं नान्यच्छाखास्वमुख्यतः ॥ तथाचपाराशरः ॥ समाप्तावन्तरादियन्मेत्रब्रा
ह्मणयोर्द्विजः ॥ ओंखंब्रह्मेतियोध्यानं दर्शकश्चोपवेधसः ॥ तथाचयाज्ञ
वल्क्यः ॥ ॐ कारपूर्वकं त्रिगुणं त्र्यक्षरं चदैवतं ॥ त्रिब्रह्मसु ॥ त्रिषुस्था
नेत्रिकल्पं त्रिप्रतिष्ठितं ॥ सचराजत्तमश्नोति ॥ अन्यच्च ॥ ॐ कारस्त्रिगुण
प्रोक्तं खंब्रह्मत्रिगुणं तथा ॥ माध्यंदिनीयशाखायायजुर्वेदपठंति हि ॥ इति
ऋषीन्प्रब्रह्मोपदेशः ॥ पराशरोक्तः ॥ तस्माद्वेदार्थपारगतया भगवताका
त्यायनाचार्येण माध्यंदिनीसंज्ञाशाखायायजुर्वेदाम्नायत्वान्मुख्यत्वमुक्तं
मिति ॥ एवमेवोक्तं श्रीहृद्कल्पद्रुमे अनंतदेवैः ॥ खंब्रह्मांतयाः काण्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के० शाखायायजुर्वेदाम्नायपिअभावस्तथापिमाध्यंदिनशाखायाः सर्ववाज भं०
सनेयिशाखासाधारण्यात्पराशरोक्ताह्रद्रेतिकर्तव्यताविधिसर्ववाजस
नेयिशाखासाधारण्यमितिचेदुच्यते॥ नित्यनैमित्तिककाम्यवैकल्पिकानि
कर्माणि भगवानासूत्रकृता माध्यंदिनशाखायाः सर्वशाखासाधारण्येनो
पनिबद्धानीति माध्यंदिनीशाखा सर्वशाखा साधारणेति॥ पथ्योगन्वा
धानमध्वर्युयजमानौ वेति सूत्रव्याख्यानावसरे शाखाद्वयमधिकृत्य तास
र्येणानुप्रवृत्त आचार्यस्तत्र नित्यनैमित्तिककाम्यवैकल्पिकातिकर्मेनोप
निबद्धानि॥ शाखाद्वयव्यतिरेकेण नैसमिकमात्रेमे वेतिकर्त्तापाद्यपायेन
तत्॥ तथापि माध्यंदिनशाखामेवाधिकृत्याचार्यप्रवृत्तिमुख्या॥ आचा
र्याभिप्रायात्॥ तथाहि येमत्रा माध्यंदिनशाखांतः कण्वशाखायामधी
काः समधीताः॥ मित्रस्यत्वाचक्षुषाप्रतीक्ष इति॥ नमः कृताय कर्मण इति॥

२६

31

आप्यायतांध्रुवाहविषेति॥ उलूखले मुसलेसेवमादयस्तेतु मंत्रासंपू
र्णा एव भगवतासूत्रे उपनिषद्भी:॥ येत्तु काण्वेशाखांतो माध्यंदिनशाखा
यामधिकः समधीताः अयमग्निः पुरीष्यो रयिमानिती॥ शिवोनामासि
स्वधितिस्तेइति॥ अंगिरसो नः पितर इत्येवमादयस्तेतु द्वयोः समाम्नाता
मंत्राइवप्रतिष्ठमात्रेणैवोपनिषद्धा इति॥ द्वयोश्शाखयोः समुच्चयप्रवृत्ति
स्तेमाध्यंदिन माध्यंदिनशाखायामप्यनधीतः माध्यंदिनशाखामंत्रासंपू
र्णाइवसूत्रे भगवतोपनिषद्धाभवेयुः॥ यस्तु सूत्रकृता काण्वमाध्यंदि
नशाखयोः समाम्नातोयस्मात्वमधिजातोसीतिमंत्रः सूत्रेउपनिषद्धे
स्तस्य पत्न्यामप्यनूहप्रसंग्यप्यर्थत्वेप्रयोजकत्वान्नदोषः॥ अतएवोक्तं
अनन्तयज्वपितृभूतिवासुदेवककोपाध्यायानंतदेवयाज्ञिकादिभिर्भा
ष्यकारैः सकलमंत्रपाठः पत्न्यामप्यनूहप्रसंगास्यार्थ इति॥ तस्मान्माध्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनीशाखैः पंचदशासुवाजसनेइशाखासुमुख्या॥ सर्वसाधारण॥ अतये
वोक्तं वाशिष्टेन माध्यंदिनी तु याशाखा सर्वसाधारणा हि सेति संक्षेपः॥ इ
ति श्रीकंटाभर्णअग्नीमंत्रैविचारः समाप्तः॥ छ॥ छ॥ छ॥ ॥छ॥छ॥
छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥

३७

K K S U LIBRARY
RAMTEK
441 106
M1142
Dist. Nagpur

५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.10.20 15:44
,TRANSFERRED=2020/10/19 at 15:51:37
,PAGES=34
,TYPE=STD
,NAME=S0004180
,Book Name=M-1142-KUNNABHARAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection